॥ श्रीमद्धनुमद्भीममध्वान्तर्गतरामकृष्णवेदव्यासात्मकश्रीलक्ष्मीहयग्रीवाय नमः ॥

॥ हरिः ॐ ॥

श्रीमन्मध्वभगवत्पादाचार्यविरचितं

ब्रह्मसूत्रानुव्याख्यानम्

नारायणं निखिलपूर्णगुणैकदेहं निर्दोषमाप्यतममप्यखिलैः सुवाक्यैः ।
अस्योद्भवादिदमशेषविशेषतोऽपि वन्द्यं सदा प्रियतमं मम सन्नमामि ॥ १ ॥

श्रीपद्मनाभतीर्थभट्टारकविरचिता

सन्न्यायरत्नावलिः

नारायणमसङ्ख्येयकल्याणगुणविग्रहम् ।
वन्दे भक्त्या सदा ध्वस्तदूषणं परमप्रियम् ॥ १ ॥

नमो भगवते तस्मै व्यासरूपाय विष्णवे ।
यत्प्रसादात् परं ज्ञानं प्राप्यते विबुधादिभिः ॥ २ ॥

श्रीमदानन्दतीर्थाख्यान् गुरून् विद्यादिवाकरान् ।
वन्दे कुदृष्टिदुर्बोधव्याससिद्धान्तदीपकान् ॥ ३ ॥

तत्कृतां ब्रह्मसूत्राणामनुव्याख्यां यथामति ।
विवृणोम्यर्थगम्भीरां हरितत्त्वप्रकाशिकाम् ॥ ४ ॥

ग्रन्थादौ शिष्टाचारादिप्राप्तस्य मङ्गलाचरणरूपस्वेष्टदेवतानमस्कारस्य प्रारीप्सितग्रन्थपरिसमाप्तिप्रचयाद्यर्थत्वाच्छिष्टजनाग्रणीराचार्यः स्वेष्टदेवतां सन्नमति ॥ **नारायणमिति** । नारायणस्य नम्यत्वोपपादकं **निखिलेत्यादि** ।

गुणवत्त्वेऽपि चेतनत्वेन हिरण्यगर्भादिवद्दोषवत्त्वं मा भूदित्युक्तं निर्दोषमिति। एवम्भूतत्वादेवाखिलैः सुवाक्यैर्ज्ञानद्वारातिशयेन प्राप्यम्। निखिलपूर्णगुणोपपादनायोक्तमस्योद्भवादिदमिति। विश्वस्योद्भवादिदातारमित्यर्थः। अत एव वन्द्यम्। [१]अशेषाद्विशिष्टत्वादपि वन्द्यम्। यो हि जननादिकर्ता यश्च गुणाधिकः स हि वन्द्यो भवति। अत एवंभूतत्वादेव प्रियेभ्यः स्वात्मादिभ्योऽतिशयेन प्रियम्। तेषां प्रियत्वापादकत्वात्। [२]इतरेषां प्रायस्तथानुभूत्यभावान्ममेत्युक्तम्। समिति श्रद्धाभक्त्यतिशयपूर्वकत्वमाह नमस्कारस्य। अनेनैव श्लोकेनाध्यायचतुष्टयार्थं सूचितवान्। निखिलपूर्णगुणैकदेहमिति समन्वयं सूचयति। निर्दोषमित्यविरोधम्। अखिलैः सुवाक्यैराप्यतममिति साधनम्। अस्योद्भवादिदमिति फलम्। अनेनैवाधिकारिविषयप्रयोजनसम्बन्धान् शास्त्रारम्भेऽपेक्षितान् सूचयति। सन्नमामीत्यधिकारिणं सूचयति। नारायणमिति विषयम्। आप्यतममिति प्रयोजनम्। उद्भवादिदमिति विषयप्रयोजनयोर्दातृदेयलक्षणसम्बन्धम्।

---

[१] न्यायसुधा – विशिष्यते वस्त्वेभिरिति विशेषा असाधारणधर्मा, अशेषाश्च ते विशेषाश्च। अपिरभिव्याप्तौ। यावन्तो वन्द्यत्वनिमित्तभूता धर्मास्तेभ्यो विशेषेभ्योऽपि हेतुभ्यो वन्द्यम्। तथाऽशेषाद्वन्द्यत्वेन समाशङ्कितात्पद्मापद्मभवादेर्जगतो विशेषोऽतिशयोऽशेषविशेषः सर्वोत्तमत्वम्। ततो हेतोः सतीष्वन्यासु देवतासु वन्द्यमिति।

[२] न्यायसुधा – सदेत्यनेन परमप्रेमयोग्यत्वम्। तस्याननुभाविकत्वादसम्भवमाशङ्क्य सदा ममेत्युक्तम्। अन्येषामपि ज्ञानोत्तरकालमिदमानुभाविकं मम तु सदेति।

नारायणशब्दश्च व्याक्रियते निखिलपूर्णेत्यादिना श्लोकेन। नाराणां गुणानामयनत्वात्। अराणां दोषाणामयनं न भवतीति नारायण इत्याद्यूहनीयम्[१]।

श्रीनारायणपण्डिताचार्यविरचिता

नयचन्द्रिका

विष्णुं सम्पूर्णविज्ञानपरमानन्दविग्रहम्।
कमलाकान्तमत्यन्तमन्तर्बहिरुपास्महे॥ १॥

श्रीमन्नारायणाख्यानं सज्ज्ञानानन्दलक्षणम्।
वेदान्तवेदितौदार्यं मुख्यं ब्रह्म प्रतन्महे॥ २॥

येन गोवर्धनच्छद्मछत्रेणात्रायि गोव्रजः।
कृष्णं तमतसीकृष्णं वन्दे सौन्दर्यवारिधिम्॥ ३॥

नमो वेदान्तराद्धान्तसूक्तिरत्नाकरात्मने।
श्रीमदानन्दतीर्थाख्यभगवद्दुग्धसिन्धवे॥ ४॥

त्रिविक्रमार्यवर्याणां गुरूणां पादरेणवः।
दिशन्तु शश्वदस्माकं शुद्धिं बुद्धेर्गिरामपि॥ ५॥

तं पद्मनाभतीर्थाब्धिं पद्मनाभप्रियं भजे।

---

[१] न्यायसुधा – उपकारित्वादिना नाराणामिमे नारा वेदादयः प्रतिपाद्यतया तदयनत्वाद्वा। नराणामिदं नारमुद्धवादि दातृतया तस्यायनत्वाद्वा। नरसमूहो नारं वन्द्यतया तदयनत्वाद्वा। नराणामधिपतिर्नारो मुख्यवायुः परमप्रेमास्पदतया तस्यायनत्वाद्वेति यथाक्रममवगन्तव्यम्।

सन्न्यायरत्नावल्याख्याद्यतो मध्वेन्दुबृंहितात् ॥ ६ ॥

अनुव्याख्यासुधाम्भोधौ गम्भीरे विहरन्ति ये ।
तेषां परमहंसानां पद्मच्छायामुपास्महे ॥ ७ ॥

सन्न्यायरत्नावलयः सन्न्यायामृतबिन्दवः ।
श्रीमत्तत्त्वप्रदीपाश्च सन्तु नश्शरणप्रदाः ॥ ८ ॥

श्रीमद्गुरूणां कारुण्यकल्पवृक्षसमाश्रयात् ।
अभिप्रायोऽनुभाष्यस्य यावद्बोधमनूद्यते ॥ ९ ॥

ॐ नारायणं निखिलपूर्णगुणैकदेहं निर्दोषमाप्यतममप्यखिलैः सुवाक्यैः अस्योद्भवादिदमशेषविशेषतोऽपि वन्द्यं सदा प्रियतमं मम सन्नमामीत्यनेनानुभाष्यमारभमाणो भगवानभीष्टदेवतामभिष्टुवन्नमस्करोति शिष्टाचारपरिरक्षणार्थम् । अनेनैवाधिकारिविषयप्रयोजनानि तत्सम्बन्धं च सूचयति । प्रथमत एव प्रयोजनस्यावगतौ प्रवृत्तिस्सम्भवतीति तत्सूच्यते । अस्योद्भवादिदमित्यादिशब्देन मोक्षस्यापि विवक्षितत्वान्निर्दुःखसुखात्मके मोक्षे प्रयोजने सर्वेषामपि प्रवृत्तिः प्रसज्यते । तद्व्युदासायाधिकारिणं विशिनष्टि ॥ **सन्नमामीति** । सन्नमामीत्यष्टाङ्गविशिष्ट एव प्रणामो विवक्षितः । उरसा शिरसा दृष्ट्या मनसा वचसा तथा पद्भ्यां कराभ्यां जानुभ्यां प्रणामोऽष्टाङ्ग ईरित इत्यष्टाङ्गान्युच्यन्ते । उरआदिना प्रणिपातः । मनसा सद्भक्तिकं स्मरणम् । वचसा वेदमन्त्रवचनम् । एवं च ह्यध्ययनवान्सुभक्तिमानेवाधिकारीत्युक्तं भवति । अहं सन्नमामीत्युक्ते सत्यप्यनन्ताधिकारिण इति सूचितं भवति । वेदोऽखिलो धर्ममूलं स्मृतिशीले च तद्विदाम् आचारश्चैव साधूनामात्मनस्तुष्टिरेव चेति वचनादाचारस्यापि धर्ममूलत्त्वाच्छास्त्रप्रयोजनं च

शास्त्रप्रतिपाद्याद्भवितुमर्हति। तदर्थं प्रतिपाद्यं विषयमपि सूचयति॥ **नारायणमिति**। एवं प्रतिपादकत्वं शास्त्रस्य प्रतिपाद्यत्वं नारायणस्य प्रयोजनं दातृदेयभावं च देयत्वं ग्राह्यत्वं प्रयोजनस्य गृहीतृत्वं चाधिकारिण इति सम्बन्धश्च सूचितः। एतेऽर्था भगवतैव प्रथमसूत्रे ह्याक्षिप्ताः। अथशब्देनाधिकार्यतः शब्देन प्रयोजनं ब्रह्मशब्देन विषयः प्रतिपाद्यप्रतिपादकत्वलक्षणसम्बन्धश्च। **नारायणं सन्नमामी**त्यन्वयः। **निखिलपूर्णगुणैकदेह**मित्यादिविशेषणचतुष्टयेनाध्यायचतुष्टयोपदिष्टमुपक्षिपति। निखिलैः पूर्णगुणैरभिन्नदेहं गुणात्मकदेहमित्यर्थः। तत्तत्समन्वयोक्त्या गुणपूर्णत्वमेव हि प्रथमाध्याये विवक्षितम्। द्वितीये तत्तद्विरोधपरिहारेण दोषरहितत्वं विवक्षितम्। तच्चाह॥ **निर्दोषमिति**। **सुवाक्यैः** सुष्टुवाक्यैः। **आप्यतमं** ज्ञेयतमम्। परब्रह्मण्यधिकृततातात्पर्यत्वेन सुनिश्चितवेदवाक्याः सुवाक्याः पुरुषाः सुवाक्याः। ज्ञानवचनेनैव तत्साधनवैराग्यभक्त्युपायोऽपि सूचितो भवति। अयमेव हि तृतीयाध्यायार्थः। फलाध्यायार्थो

मोक्षश्चा**शेषविशेषतोऽप्यस्योद्भवादिदमि**ति सूच्यते। **अस्य** जगत उद्भवस्थितिसंहारनियमनज्ञानाज्ञानबन्धमोक्षप्रदम् अशेषैरपि विशेषैः सहेत्यर्थः। सन्ति ह्युद्भवादिविशेषा ब्रह्मादिषु तारतम्यनिबन्धनाः प्रतिक्षणविशेषाश्च मोक्षादिषु देवत्वादियोग्यताविशेषाश्च। अशेषविशेषतोऽपीत्युपरि सम्बध्यते। अशेषैर्ज्ञानानन्दादिभिर्विशेषैश्च सह **मम सदा वन्द्यं प्रियतमम्** । वन्दनं स्तुतिः प्रणामो वा। वदि अभिवादनस्तुत्योरिति धातुः। अनेनानन्तगुणस्य नारायणस्य प्रवचन उपास्तौ चात्मनो मुख्याधिकारित्वं सूचयति। भक्तिं च

स्नेहबहुमानरूपाम्। अत एव तस्येष्टदेवतात्वं च। प्रियतमत्वस्य विशिष्टस्नेहविषयत्वस्य सख्यादिष्वपि सम्भवात्तद्व्यवच्छेदाय वन्द्यमिति बहुमानविषयत्वं ह्यभिप्रेयते।

तमेव शास्त्रप्रभवं प्रणम्य जगद्गुरूणां गुरुमञ्जसैव।

विशेषतो मे परमाख्यविद्याव्याख्यां करोम्यन्वपि चाहमेव॥ २॥

(सन्न्यायरत्नावलिः) एवं शास्त्रप्रतिपाद्यं नारायणं नमस्कृत्येदानीं तमेव शास्त्रकर्तारं वेदव्यासं प्रणमति ग्रन्थारम्भं च प्रतिजानीते॥ **तमेवेति**। शास्त्रप्रतिपाद्यरूपेण नमस्कृतस्यैव शास्त्रप्रवक्तृरूपेण प्रणामस्तत्प्रीत्यतिशयार्थः। **तं शास्त्रप्रभवं प्रणम्य परमाख्यविद्यायाः** ब्रह्मसूत्रात्मिकायाः **व्याख्यामन्वपि करोमी**त्यन्वयः। अनुव्याख्यायाः अन्येन कर्तुमशक्यत्वादहमेवेत्याह। **अञ्जसैव जगद्गुरूणां गुरु**मिति मुख्यगुरुत्वमभिप्रैति। मुख्यगुरुत्वं च भगवतो जनकत्वेन पोषकत्वेन विघ्ननिवारकत्वेन चित्तप्रेरकतया चाचार्यादिसम्पादनद्वारा ज्ञानदातृत्वात्। **विशेषतो म** इति साक्षाद्भगवान् व्यासो गुरुरित्याह।

(नयचन्द्रिका) तमेवेत्यादिना तामेव शास्त्रप्रतिपाद्यामभीष्टदेवताम् शास्त्रगुरुत्वेन **जगद्गुरूणां** ब्रह्मादीनां **विशेषतः** स्वतः स्वगुरुत्वेनापि **प्रणम्य** ग्रन्थारम्भं प्रतिजानीते। शास्त्रं भावयतीति **शास्त्रप्रभवः** शास्त्रकर्ता। **अञ्जसैव** सम्यगेवेत्यनेन सर्वत्रापि मुख्यगुरुत्वं प्रतीयते। परमेत्याख्या यस्या विद्यायाः सा परमाख्यविद्या । ब्रह्ममीमांसेत्यर्थः। अथ परा यया तदक्षरमधिगम्यत इति श्रुतेः। **अन्वपि चाहमेव** भाष्यकारणमप्यहमेव च व्याख्यां करोमि। अन्यस्य शक्त्यभावादिति चशब्दः।

प्रादुर्भूतो हरिर्व्यासो [1]विरिञ्चभवपूर्वकैः।

अर्थितः परविद्याख्यं चक्रे शास्त्रमनुत्तमम्॥ ३॥

(सन्न्यायरत्नावलिः) शास्त्रप्रभवमित्युक्तं विवृणोति॥ **प्रादुर्भूत इति।** न विद्यते उत्तमं शास्त्रं यस्मात्तद**नुत्तमम्।**

(नयचन्द्रिका) सूत्राणां प्रामाण्यं साधयितुमाप्तिमूलत्वादिकं दर्शयति॥ **प्रादुर्भूत इति।**

गुरुर्गुरूणां प्रभवः शास्त्राणां बादरायणः।

यतस्तदुदितं मानमजादिभ्यस्तदर्थतः॥ ४॥

(सन्न्यायरत्नावलिः) ननु सूत्राणां प्रामाण्ये सिद्धे सिद्धं व्याख्येयत्वम्। तच्च कथमित्याशङ्क्याह॥ **गुरुर्गुरूणामिति। गुरूणां** ब्रह्मादीनां ज्ञानप्रदाता महाभारतादीनां शास्त्राणां कर्ता बादरायणो यतोऽतोऽजादिभ्यः श्रोतृभ्योऽर्थायोक्तं। संशयविपर्ययादिरहितत्वात्। ब्रह्मसूत्राख्यं शास्त्रं प्रमाणम्।

(नयचन्द्रिका) ब्रह्मादीनां शास्त्रगुरूणां गुरुत्वादस्य तद्वचनविरोधो नास्ति। प्रातिकूल्ये स्वगुरुविरोधात्तस्यैवाप्रामाण्यप्राप्तेः। शास्त्राणां भारतादीनां प्रभवत्वादस्य न तद्विरोधोऽपि। एवंभूतो **बादरायण इति यतो**ऽ**तस्तदुदित**माप्तिमूलत्वेन **मानम्। तदर्थत**स्तत्प्रयोजनाय। तथा हि।

---

[1] विरिञ्चशिवपूर्वकैः इत्यपि पाठः।

हरिरेव व्यासरूपो वक्ता। ज्ञानवक्रभावादापदि विरिञ्चादीनामर्थनाप्रसङ्गोऽतस्त एवाजादयः श्रोतारोऽपि।

वक्तृश्रोतृप्रसक्तीनां यदाप्तिरनुकूलता।

आप्तवाक्यतया तेन श्रुतिमूलतया तथा॥ ५॥

युक्तिमूलतया चैव प्रामाण्यं त्रिविधं महत्।

दृश्यते ब्रह्मसूत्राणामेकधान्यत्र सर्वशः॥ ६॥

(सन्न्यायरत्नावलिः) ननु पौरुषेयवाक्यानामाप्तोक्तत्वेन प्रामाण्यमवधृतम्। आप्तोक्तत्वं च कथमित्यत आह॥ **वक्तृश्रोतृप्रसक्तीनामिति**। इदमेव ह्याप्तोक्तत्वं यद्वक्तृश्रोतृप्रसक्त्यानुकूल्यम्। वक्त्रानुकूल्यं तावद्भगवतो वेदव्यासस्य वक्तृत्वादस्त्येव सूत्राणाम्। श्रोत्रानुकूल्यं च ब्रह्मादीनां श्रोतृत्वात्। प्रसङ्गानुकूल्यं चाज्ञाननिर्हरणार्थेन प्रवृत्तेः। तत्रैकैकानुकूल्याभावेऽप्यनाप्तत्वम्। यथा जैनवाक्येषु वक्त्रानुकूल्याभावादाप्तिशून्यत्वम्। यथा श्रोत्रानुकूल्याभावादाप्तिशून्यत्वं बुद्धवाक्येषु। यथा च प्रसङ्गानुकूल्याभावादाप्तिशून्यत्वं नर्मादिवाक्येषु। तच्चोक्तं भारते। न नर्मयुक्तमनृतं हिनस्ति न स्त्रीषु राजन्नविवाहकाले प्राणात्यये सर्वधनापहारे पञ्चानृतान्याहुरपातकानीति[१]। न केवलमाप्तोक्तत्वात्प्रामाण्यमपितु श्रुतिमूलत्वाद्युक्तिमूलत्वाच्च।

---

[१] महाभारते – आदिपर्वणि (अध्याय – १८, श्लोक – २४)
शान्तिपर्वणि (अध्याय – १६६, श्लोक – ३०)

अतस्त्रिविधं प्रामाण्यं ब्रह्मसूत्राणां [१]**जैमिन्यादिवाक्येषु त्वैकैकधा प्रामाण्यम्।**

(नयचन्द्रिका) ननु भगवताऽजाद्यर्थनाप्रसङ्गे तेभ्य उदितमित्येतावता कथमाप्तिमूलत्वमित्यत आह॥ **वक्त्रिति। वक्तृश्रोतृप्रसक्तीनामनुकूलता आप्तिरिति यत्तस्मादेव। अनुकूलताऽप्तिरित्युक्ते**ऽनुकूलतयाऽप्तिरित्यर्थः। स वै बलं बलिनां चापरेषामितिवन्निमित्तनैमित्तिकयोरभेदव्यवहारसम्भवात्। वक्त्रादीनामेकतमस्याप्यननुकूलत्वेऽप्याप्तिर्न सङ्गच्छते। जिनादिवक्तृवाक्यानामप्रामाण्योपलब्धेः। नर्मादिप्रसङ्गे स्त्रीजने श्रोतरि वाऽनृतवचनस्यादूषणत्वाच्च। न नर्मयुक्तमनृतं हिनस्ति न स्त्रीषु राजन्न विवाहकाले प्राणात्यये सर्वधनापहारे पञ्चानृतान्याहुरपातकानीति भारतोक्तन्यायेन। **आप्तवाक्यतया** श्रुतिभिर्लिङ्गैश्चार्थनिर्णायकत्वाच्छ्रुतिमूलतया युक्तिमूलतया च। **एकधाऽन्यत्र** गौतमादिसूत्रेषु।

अतो नैतादृशं किञ्चित् प्रमाणतममिष्यते।

स्वयं कृतापि तद्व्याख्या क्रियते स्पष्टतार्थतः॥ ७॥

---

[१] न्यायसुधा – जैमिन्यादिवाक्ये त्रेधाप्यस्तीति चेत्। सत्यम्। यथा ब्रह्मसूत्रेषु न तथा। निरवधिकं हि तत्राप्त्यादिकम्। एतदर्थमपि महदित्येतत्त्रिविधमित्यनेनापि योजनीयम्।

(सन्न्यायरत्नावलिः) अतो ब्रह्मसूत्रसदृशं **न प्रमाणतमम**स्त्यतः प्रमाणतमत्वाद्व्याख्येयम्। यद्यपि भाष्यरूपेण व्याख्यातमिदं शास्त्रम्। तथाप्यस्पष्टस्पष्टीकरणाय[1] व्याख्यायत इत्यदोषः।

(नयचन्द्रिका) स्वयं कृताऽपि तद्व्याख्या भाष्यरूपेण। तत्र न किञ्चिदप्यनुक्तम्। तथाऽपि पुनः **क्रियते स्पष्टतार्थतः** स्पष्टत्वप्रयोजनाय।

---

[1] न्यायसुधा – स्पष्टीकरणं चानेकविधम्। क्वचिदनुक्तांशस्योक्तिः। क्वाप्यतिसङ्क्षिप्तस्य विस्तरणम्। क्वचिदतिविस्तृततया बुद्ध्यनारूढस्य सङ्क्षेपः। क्वापि विवक्षितस्यैकीकरणम्। कुत्राप्युक्तस्योपपादनम्। क्वचिदपव्याख्याननिरासेन दृढीकरणमित्यादि तत्र तत्र द्रष्टव्यम्।